12. Tasmin ēva kṣaṇē ēkalavyēna sapta śarāḥ kukkurasya āsyē kṣiptāḥ.
13. Tat Karma dṛṣṭvā arjunēna īrṣyā anubhūtā.
14. Drōṇaḥ tu tat sarvam śrutvā arjunēna saha ēkalavyam āgacchat.
15. Ēkalavyaḥ drōṇam dṛṣṭvā drōṇasya pādayōḥ patitavān.
16. Drōṇaḥ tam avadat ēkalavya mama śiṣya dānam icchāmi iti.
17. Yat yat mama guruḥ icchati tat tat dāsyāmi iti ēkalavyaḥ prativadati sma.
18. Tava aṅgulīm icchāmi iti drōṇaḥ uktavān.
19. Ēkalavyēna aṅgulī sasmitam chinnā drōṇāya dattā ca.
20. Adhunā arjunasya īrṣyā gatā..

## Lesson 5

Draupadī kṛṣṇēna raksitā – Draupadī is protected by Kṛṣṇa

1. Rājā yudhiṣṭhiraḥ duryōdhanēna krīḍāyām jitaḥ.
2. Rājñaḥ yudhiṣṭhirasya bahu dhanam bahavaḥ rathāḥ sundarāḥ aśvāḥ
3. sādhavaḥ sēvakāḥ viśālāḥ gajāḥ ca duryōdhanēna jitāḥ.
4. Antē pāṇḍavānām bhāryā draupadī nāma api tēna jitā.
5. Śuddhā daupadī duḥśāsanēna kēśaiḥ gṛhītā duryōdhanam prati ānītā ca.
6. Draupadī asmākam sēvakā bhaviṣyati iti duḥśāsanaḥ sasmitam uktava.
7. Tat Uditvā Duḥśāsanaḥ Draupadyāḥ Vastram Akarṣayat.
8. Tam adharmam dṛṣṭvā sarvē sādhavaḥ janāḥ arōdan.
9. Hē Kṛṣṇa katham api mām rakṣa iti bhītā draupadī akrōśat.
10. Draupadyāḥ vastram annatam abhavat.
11. Antē duḥśāsanaḥ śrāntaḥ bhūtvā hataḥ vṛkṣaḥ iva bhūmim prati patitavān.
12. Krōdhēna pūrṇaḥ bhīmaḥ avadat asya duḥśāsanasya raktam pāsyāmi iti.
13. Krīḍāyām jitāḥ pāṇḍavāḥ draupadyā saha vanam gatavantaḥ.

# भगवद्गीता

## धृतराष्ट्र उवाच

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।।१.१।।

## सञ्जय उवाच

२. श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।
तान्समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्।।१.२७।।

३. एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।।१.३५।।

## श्री भगवान् उवाच

४. क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।२.३।।

## अर्जुन उवाच

५. कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।२.७।।

**श्री भगवान् उवाच**

६. वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा
न्यनयानि संयाति नवानि देही।।२.२२।।

७. जातस्य हि ध्रवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे
न त्वं शोचितुमर्हसि।।२.२७।।

८. स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते।।२.३१।।

९. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।२.४७।।

१०. न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।३.५।।

११. तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः।।३.१९।।

**श्री भगवानुवाच**

१२. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।४.७।।

१३. परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म संस्थापनार्थाय सम्भवामि युगे युगे।।४.८।।

१४. समं पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।१३.२८।।

१५. समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः।।१४.२४।।

**श्री भगवान् उवाच**

१६. अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।१६.१।।

१७. अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।१६.२।।

१८. तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीम् अभिजातस्य भारत।।१६.३।।

१९. न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।।१८.११।।

२०. श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।।१८.४७।।

## Bhagavadgītā

**Dhṛtarāṣṭra Uvāca**

1. Dharmakṣētrē Kurukṣētrē Samavētā Yuyutsavaḥ.
   Māmakāḥ Pāṇḍavāścaiva Kimakurvata Sañjaya..1.1..

**Sañjaya Uvāca**

2. Svaśurān Suhṛdaścaiva Sēnayōrubhayōrapi.
   Tānsamīkṣya Sa Kauntēyaḥ Sarvān Bandhūnavasthitān..1.27..

3. Ētānna Hantumicchāmi Dhnatō'pi Madhusūdana.
   Api Trailōkyarājyasya Hētōḥ Kiṃ Nu Mahīkṛtē..1.35..

**Śrī Bhagavān Uvāca**

4. Klaibyaṃ Mā Sma Gamaḥ Pārtha Naitattvayyupapadyatē.
   Kṣudraṃ Hṛdayadaurbalyaṃ Tyaktvōttiṣṭha Parantapa..2.3..

**Arjuna Uvāca**

5. Kārpaṇyadōṣōpahatasvabhāvaḥ
   Pṛcchāmi Tvāṃ Dharmasammūḍhacētāḥ.
   Yacchrēyaḥ Syānniścitaṃ Brūhi Tanmē
   Śiṣyastē'haṃ Śādhi Māṃ Tvāṃ Prapannam..2.7..

**Śrī Bhagavān Uvāca**

6. Vāsāṃsi Jīrṇāni Yathā Vihāya
Navāni Gṛhṇāti Narō'parāṇi.
Tathā Śarīrāṇi Vihāya Jīrṇā
Nyanayāni Saṃyāti Navāni Dēhī..2.22..

7. Jātasya Hi Dhravō Mṛtyurdhruvaṃ Janma Mṛtasya Ca.
Tasmādaparihāryē'rthē
Na Tvaṃ Śōcitumarhasi..2.27..

8. Svadharmamapi Cāvēkṣya Na Vikampitumarhasi.
Dharmyāddhi Yuddhācchrēyō'nyat Kṣatriyasya Na Vidyatē..2.31..

9. Karmaṇyēvādhikārastē Mā Phalēṣu Kadācana.
Mā Karmaphalahēturbhūrmā Tē Saṅgō'stvakarmaṇi..2.47..

10. Na Hi Kaścit Kṣaṇamapi Jātu Tiṣṭhatyakarmakṛt.
Kāryatē Hyavaśaḥ Karma Sarvaḥ Prakṛtijairguṇaiḥ..3.5..

11. Tasmādasaktaḥ Satataṃ Kāryaṃ Karma Samācara.
Asaktō Hyācaran Karma Paramāpnōti Pūruṣaḥ..3.19..

**Śrī Bhagavānuvāca**

12. Yadā Yadā Hi Dharmasya Glānirbhavati Bhārata.
Abhyutthānamadharmasya Tadātmānaṃ Sṛjāmyaham..4.7..

13. Paritrāṇāya Sādhūnāṃ Vināśāya Ca Duṣkṛtām.

Dharma Saṃsthāpanārthāya Sambhavāmi Yugē Yugē..4.8..

14. Samaṃ Paścan Hi Sarvatra Samavasthitam Īśvaram.

Na Hinastyātmanātmānaṃ Tatō Yāti Parāṃ Gatim..13.28..

15. Samaduḥkhasukhaḥ Svasthaḥ Samalōṣṭāśmakāñcanaḥ.

Tulyapriyāpriyō Dhīrastulyanindātmasaṃstutiḥ..14.24..

Śrī Bhagavān Uvāca

16. Abhayaṃ Sattvasaṃśuddhirjñānayōgavyavasthitiḥ.

Dānaṃ Damaśca Yajñaśca Svādhyāyastapa Ārjavam..16.1..

17. Ahiṃsā Satyamakrōdhastyāgaḥ Śāntirapaiśunam.

Dayā Bhūtēṣvalōluptvaṃ Mārdavaṃ Hrīracāpalam..16.2..

18. Tējaḥ Kṣamā Dhṛtiḥ Śaucamadrōhō Nātimānitā.

Bhavanti Sampadaṃ Daivīm Abhijātasya Bhārata..16.3..

19. Na Hi Dēhabhṛtā Śakyaṃ Tyaktuṃ Karmāṇyaśēṣataḥ.

Yastu Karmaphalatyāgī Sa Tyāgītyabhidhīyatē..18.11..

20. Śrēyānsvadharmō Viguṇaḥ Paradharmātsvanuṣṭhitāt.

Svabhāvaniyataṃ Karma Kurvannāpnōti Kilbiṣam..18.47..

# Five stories from the Pañcatantram with introduction

**Lesson 1**

**Mitrabheda Tantram.**
**Kathā 13**

**Kambugrīva- kacchapa Kathā**

Kasminścit jalāśaye Kambugrīvo nāma kacchapa avasat.

Tasya ca saṅkaṭa-vikaṭa-nāmni mitre haṁsa-jātiye parama-sneha-koṭim āśrite nityam eva saras-tīram āgatya tena saha aneka-devarṣi-maharṣiṇām kathāḥ kṛtvā sāyaṁkāle svaniḍaṁ prati agacchatām.

Gacchatā kālena anāviṣṭa-vaśāt saraḥ śanaiḥ śanaiḥ śoṣam agamat.

Tataḥ tad-duḥkha-dukhitau tau avadatām, "bho mitra! Jalarahita etat sarah sañjātam. Tat katham bhavān bhaviṣyati iti vyākulitvaṁ no hṛdi vartate." Tat śrutvā kambugrīva avadat, "Bhoḥ, sāmpratam nāsti asmākam jīvitavyam jalābhāvāt.Tathāpi upāya cintyatām iti.

Tad āniyatāṁ kācid dṛḍha-rajjuḥ laghu-kāṣṭhāṁ vā, anviṣyatāṁ ca prabhūta-jalasanāthaṁ saraḥ, yena mayā madhya-pradeśe dantaiḥ gṛhīte sati yuvāṁ koiṭi-bhāgayoḥ tat kāṣṭhaṁ mayā sahitaṁ saṁgṛhya tat saraḥ nayathaḥ.

Tau akathayatām, "Bho mitra! Evaṁ kariṣyāvaḥ. Paraṁ maunavratena sthātavyam. No cet tava kāṣṭhāt bhaviṣyati." Tathā anuṣṭhite gacchatā kumbagrīveṇa adho-bhāga-vyavasthitaṁ kiñcit puraṁ ālokitam. Te tathā nīyamānaṁ vilokya savismayam idam avadan , " Aho cakra-ākāraṁ kimapi pakṣibhyāṁ nīyate. Paśyata . Paśyata ." Atha teṣāṁ kolāhalam ākarṇya Kambugrīva avadat, "Bhoḥ, kim eṣa kolāhalaḥ?" iti vaktumanā ardho ukte patitaḥ pauraiḥ khaṇḍaśaḥ kṛtaḥ ca.

## Lesson 2

**Mitrasamprāpti Tantram.**
**Kathā 3**
**Śabara-Śūkara-Kathā**

Kasmiṁścit vanoddeśe kaścit pulindaḥ vasati sma. Sa ca ākheṭaṁ kartuṁ vanaṁ prati prasthitaḥ. Atha tena vane mahān añjana-parvata-śikharākāraḥ śūkaraḥ dṛṣṭaḥ. Taṁ dṛṣṭvā karnāntākṛsta-tikṣṇabānena samāhataḥ. Tenāpi kopāviṣṭena cetasā bālendudyutinā daṇṣṭrāgreṇa pāṭita-udarah pulindaḥ gatāsuḥ bhūtale apatat.

Atha lubdhakaṁ vyāpādya śūkaraḥ api śara-prahāra-devanayā pañcatvaṁ gataḥ. Etasmin antare kaścid āsannamṛtyuḥ śṛgāla itas tataḥ nirāhāratayā pīḍitaḥ paribhraman taṁ pradeśam āgacchat. Yāvad varāha-pulindau dvau api paśyati tāvat prahṛṣṭo vyacintayat, “Bhoḥ! sānukūlo me vidhiḥ. Tena etat api acintitaṁ bhojanam upasthitam." Tad ahaṁ tathā bhakṣayāmi yathā bahūni ahāni me prāṇāyātrā bhavati. Tat tāvad evaṁ snāyu-pāśaṁ dhanuṣkoṭigataṁ bhakṣyāmi.”

Ityevaṁ manasā niścitya cāpa-ghaṭita-koṭim mukhamadhye prakṣipya snāyuṁ bhakṣituṁ pravṛttaḥ.Tataḥ ca truṭite pāśo tālu-deśaṁ vidārya cāpa-koṭiḥ mastaka-madhyena niṣkrāntā. Saḥ api tad-vedanayā tatkṣaṇāt mṛtaḥ

## Lesson 3

**Kākolūkīya Tantram**
**Kathā 5**

**Brāhmaṇa-sarpa- Kathā**

Kasminścit adhiṣṭhāne haridattaḥ nāma brāhmaṇaḥ vasati sma. Tasya ca kṛṣi kurvataḥ sadaiva niṣphalaḥ kāla ativartate. Atha ekasmin divase sa brāhmaṇa uṣṇa-kāla-avasāne dharmarttaḥ svakṣetre-madhye vṛkṣasya chāyāyāṁ prasuptaḥ .

Anatidūre valmīka-upari prasāritaṁ bṛhat-phaṭā-yuktaṁ bhīṣaṇaṁ bhujaṅgamaṁ dṛṣṭvā acintayat , "nūnam eṣā kṣetra devatā mayā kadācid api na pūjitā.Tena idaṁ me kṛṣikarma viphalī bhavati. Tad asyā ahaṁ pūjām adya kariṣyāmi."

Iti avadhāryya kuto'pi kṣīraṁ yācitvā śarāve nikṣipya valmīka-antikam upagatya avadat

" Bhoḥ kṣetrapāla etāvantaṁ kālaṁ na jñātaṁ yat tvam atra vasasi. Tena pūjā na kṛtā. Tat sāmprataṁ kṣmasva."

Evam ukktvā dugdham na nivedya gṛha-abhimukhaṁ prāyāt.

Atha prātaḥ yāvad āgatya paśyati tāvad dīnāram ekaṁ śarāve dṛṣṭavān.

Evaṁ ca pratidinam ekākī samāgatya tasmai kṣīraṁ dadāti ekaikaṁ ca dīnāraṁ gṛhṇāti.

Atha ekasmin divase valmīke kṣīra-nayanāya putram ādiśya brāhmaṇaḥ grāmāntaram agcchat. Putraḥ api kṣīraṁ tatra nitvā saṁsthāpya ca punaḥ gṛhaṁ samāyātaḥ.

Dināntare tatra gatvā dīnāram ekaṁ dṛṣṭvā gṛhitvā ca cintitavān "nūnaṁ sauvarṇa-pūrṇaḥ ayaṁ valmīkaḥ. Tat enaṁ hatvā sarvam ekavāraṁ grahiṣyāmi."

Iti evaṁ sampradhārya anyasmin divase kṣiraṁ dadatā brāhmaṇa-putreṇa sarpaḥ daṇdena śirasi tāḍitaḥ. Tataḥ kathamapi daiva-vaśāt amukta-jivita eva roṣāt tivra-viṣa-daṁśanaiḥ tathā adaśat yathā sadyaḥ pañcatatvam upāgat.Svajanaiḥ ca nātidūre kṣetrasya kāṣṭha-sañcayaiḥ tasya dāhasaṁskāraḥ kṛtaḥ

## Lesson 4

**Lubdhapraṇāśa-Tantram**
**Kathā 1**
**Vānara-makara-kanthā**

Kasmiṁścit samudra-tīre mahān jambūpādapaḥ sadāphalaḥ āsīt.

Tatra rakta-mukha nāma vānaraḥ prativasati sma. Tatra tasya taroḥ adhaḥ kadācit karāla-mukhaḥ nāma makaraḥ samudraḥ niṣkramya tīra-upānte āgacchat.

Tataḥ ca rakta-mukhena sa proktaḥ "Bhoḥ! Bhavān samabhyāgataḥ atithiḥ.Tad bhakṣayatu mayā dattāni amṛta-tulyāni jambū-phalāni ayacchat. Uktvā tasmai jambū ayacchat.

Sa bhakṣayitvā goṣṭhịsu agacchat. Nityam eva tau vānara-makarau jambū-chāyāyāṁ sthitau vividha-śāstra-goṣṭhyā kālaṁ nayantau sukhena tiṣṭhataḥ. Saḥ api makaraḥ abhikṣita-śeṣāṇi jambū-phalāni gṛhaṁ gatvā sva-patnyai prayacchati sma.

Atha anyatame divase tayā sa pṛṣṭaḥ "Nātha! Kutaḥ evaṁ vidhāni amṛta-phalāni prāpnoṣi?" Sa avadat "Bhadre! Mama asti parama-suhṛd rakta-mukhaḥ nāma vānaraḥ. Sa prītipūrvakam imāni prayacchati."

Atha tayā abhihitam "Yaḥ sadaiva amṛtaprayāṇi idṛśāni phalāni bhakṣayati tasya hṛdayam amṛtamayaṁ bhaviṣyti. Tat yadi mayā

bharyayā te prayojanam tataḥ tasya hṛdayaṁ mahyam ānīya prayaccha

yena tad bhakṣayitvā jarā-maraṇa-rahitā tvayā saha bhojanaṁ khādāmi."

Makarah avadat "Bhadre! mā mā evaṁ vada. Yatah sa pratipannaḥ

asmākam bhrātā. Aparaṁ ca phala-dāttā. Tato vyāpādayituṁ na

śakyate.Tat tyaja enaṁ mitthyā āgraham." Makari avadat " Yadi tasya

hṛdayam na bhakṣayāmi tat āmaraṇam anaśanaṁ kariṣyāmi."

"Tat kiṁ karomi?" iti vicintya makaraḥ vānarapārśvam agacchat ca

"tava bhrātṛ -jāyā adya mām akathayat yat tvaṁ mama devaraṁ gṛhītvā

pratyupakārārthaṁ gṛham ānaya no cet tvayā saha me para-loke

darśanam.Tad āgaccha me gṛham." Vanara avadat "Bho mitra! Yuktam

abhitaṁ mad-bhrātṛ -patnyā. Paraṁ vayam vanacarāḥ yuṣmadiyaṁ ca

jalānte gṛham. Tat katham śakyate tatra gantum. Tasmāt tvam eva me

bhrātṛpatnīm atra ānīya yena praṇamya tasyāḥ āśirvādaṁ

gṛhṇāmi."Makara avadat " Bho Mitra! Asti samudrāntare suramye pulina-

pradeśe asmad-gṛham. Tat mama pṛṣṭham āruhya sukhena āgaccha tvam.

"Ahaṁ tvā tathā anuṣṭhite agādhe jaladhau śighreṇa gachantaṁ

makaram ālokya vānaraḥ sabhayam avadat "Bhrātaḥ! Śanaiḥ Śanaih—

gamyatām. Jala-kallolaiḥ plāvyate me śariram." Makara avadat "Mitra

tvaṁ mayā vadhāya samānito bhāryā –vākyena viśvāsya. Tasyāḥ tava

madhuraṁ hṛdayam asvādayitum icchā sañjātā. Smaryatām abhiṣṭa-devatā."

Pratyutpanna-matiḥ vānara avadat "Bhadre ! Yadi evaṁ tat kiṁ tvayā māṁ tatra eva na abhihitam? Ahaṁ svahṛdayaṁ sadaiva jambūkoṭare suguptaṁ sthāpayāmi.Samprati śūnya- hṛdaya-aham. " Makara avadat " Aham tvāṁ saprati eva jambū-pādapaṁ prāpayāmi." Vānaraḥ api tiraṁ prāpya jhaṭiti jambū-pādapam āruhya acintayat "Aho! Labdhāḥ tāvat prāṇāḥ ."

## Lesson 5

**Aparikṣita kākaram tantram**
**Kathā 2**

**Brāhmaṇī-nakula - Kathā**

Kasmiṁścit grāme devaśarma nāma brāhmaṇaḥ prativasati sma. Tasya bhāryā prasūtā sutam ajanayat. Tasmin eva dine nakulaṁ prasūya mṛtā. Atha sā suta-vatsalā dārakavat taṁ nakulam api apālayat paraṁ tasya viśvasiti sma. " yat kadā cit eṣa sva-jāti-doṣa-vaśāt asya dārakasya viruddham ācaraṇaṁ kartuṁ śaknomi" iti.

Ekadā sā śayyāyāṁ putraṁ śāyayitvā jala-kumbham ādāya patim avadat " Brāhmaṇaḥ jalartham ahaṁ taḍoge yāsyāmi tvayā putraḥ ayaṁ nakulāt rakṣaṇiyah . "Atha tasyāṁ gatāyāṁ pṛṣṭe brāhmaṇaḥ api śūnyaṁ gṛhaṁ muktvā bhikṣārthaṁ kvacit nirgataḥ. Atrāntare daivavaśāt kṛṣṇasarpaḥ niṣkrāntaḥ. Nakulaḥ api svabhāva-vairiṇaṁ matvā bhrātuḥ rakṣaṇārthaṁ sarpeṇa saha yuddhvā sarpaṁ khaṇḍaśaḥ kṛtavān. Tataḥ rudhireṇa āplavita-vadanaḥ sānandaḥ sva-vyāpāraṁ prakāśaṇārthaṁ mātuḥ sammukhe gataḥ.

Mātā api taṁ rudhira-klinna-mukham avalokya acintayat " nūnam anena durātmanā dārakaḥ bhakṣitaḥ" iti niścitya kopāt tasya upari taṁ jala-kumbham akṣipat .

Evaṁ mā nukulaṁ hatvā yāvat pralapati gṛhe āgacchat tāvat tayā sutaḥ tatraiva suptaḥ prāptaḥ. Samīpe kṛṣṇa-sarpaṁ khaṇḍaśaḥ kṛtam avalokya putra-vadha-śokena ātma-śiraḥ vakṣaḥ sthalaṁ ca tāḍitum ārabdhā.

Atrāntare brāhmaṇaḥ bhiksāṁ gṛhītvā samāyātaḥ yāvat paśyati tāvat puta-śoka-duḥkhitā brāhmaṇī apralapat "Bho bho lobhātman! Lobha-abhibhūtena tvayā na kṛtaṁ mad-vacaḥ. Tad anubhava sāmprataṁ putra-mṛtyu-duḥkha-vṛkṣa-phalam ."

# Five stories from पञ्चतन्त्र

### Lesson 1

**मित्रभेद तन्त्रम्**
**कथा १३**
**कंबुग्रीव-कच्छप कथा**

कस्मिंचित् जलाशये कंबुग्रीव नाम कच्छप अवसत्।

तस्य च संकट-विकट-नाम्नी मित्रे हंस-जातीये परम-स्नेह-कोटिम् आश्रिते

नित्यम् एव सरस्-तीरम् आगत्य तेन सह अनेक-देवर्षि-महर्षीणां कथाः

कृत्वा सायंकाले स्वनीडं प्रति अगच्छताम्। गच्छता कालेन अनावृष्टि-वशात्

सरः शनैःशनैः शोषम् अगमत्।

ततः तद्-दुःख-दुःखितौ तौ अवदताम् “भो मित्र! जलरहितम् एतत् सरः

संजातम्। तत् कथं भवान् भविष्यति इति व्याकुलत्वं नो हृदि वर्तते।”

तत् श्रुत्वा कंबुग्रीव अवदत् “भोः साम्प्रतं नास्ति अस्माकम् जीवितव्यं

जलाभावात्। तथापि उपायःचिन्त्यताम् इति।

तद् आनीयतां काचिद् दृढ-रज्जुः लघु-काष्ठं वा अन्विष्यतां च प्रभूत-

जलसनाथं सरः येन मया मध्य-प्रदेशे दन्तैः गृहीते सति युवां कोटि-

भागयोः तत् काष्ठं मया सहितं संगृह्य तत् सरः नयथः।

तौ अकथयताम् “भो मित्र! एवं करिष्यावः।परं भवता मौनव्रतेन स्थातव्यम्।

नो चेत् तव काष्ठात् पातो भविष्यति ।" तथा अनुष्ठिते गच्छता कंबुग्रीवेण अधो-भाग-व्यवस्थितं किंचित् पुरं आलोकितम् । तत्र ये पौराः ते तथा नीयमानं विलोक्य सविस्मयम् इदम् अवदन् "अहो चक्र-आकारं किमपि पक्षिभ्यां नीयते। पश्यत पश्यत।" अथ तेषां कोलाहलम् आकर्ण्य कंबुग्रीव अवदत् "भोः किम् एष कोलाहलः?" इति वक्तुमना अर्धो उक्ते पतितः पौरैः खंडशः कृतः च।

## Lesson 2

**मित्रसम्प्राप्तितन्त्रम्**
**कथा ३**
**शबर-शूकर-कथा**

कस्मिंश्चित् वनोद्देशे कश्चित् पुलिन्दः वसति स्म। स च आखेटं कर्तुं वनं

प्रति प्रस्थितः। अथ तेन वने महान् अंजन-पर्वत-शिखराकारः शूकरः दृष्टः।

तं दृष्ट्वा कर्णान्ताकृष्ट-तीक्ष्णबाणेन समाहतः। तेनापि कोपाविष्टेन चेतसा

बालेन्दुद्युतिना दंष्ट्राग्रेण पाटित-उदरःपुलिन्दःगतासुःभूतले अपत्।

अथ लुब्धकं व्यापाद्य शूकरः अपि शर-प्रहार-वेदनया

पञ्चत्वं गतः। एतस्मिन् अन्तरे कश्चिद् आसन्नमृत्युः शृगालः इतस्ततः

निराहारतया पीडितः परिभ्रमन् तं प्रदेशम् आगच्छत्। यावद् वराह-पुलिन्दौ

द्वौ अपि पश्यति तावत् प्रहृष्टो व्यचिन्तयत् "भोः! मानुकूलो मे विधिः।

तेन एतत् अपि अचिन्तितं भोजनम् उपस्थितम्। तद्

अहं तथा भक्षयामि यथा बहूनि अहानि मे प्राणयात्रा भवति। तत् तावद् एवं

स्नायु-पाशं धनुष्कोटिगतं भक्षयामि।"इत्येवं मनसा निश्चित्य चाप-घटित-

कोटिम् मुखमध्ये प्रक्षिप्य स्नायुं भक्षितुं प्रवृत्तः। ततः च त्रुटिते पाशे तालु-

देशं विदार्य चाप-कोटिः मस्तक-मध्येन निष्क्रान्ता।सःअपि तद्-वेदनया

तत्क्षणात् मृतः।निष्क्रान्ता। सः अपि तद्-वेदनया तत्क्षणात् मृतः।

## Lesson 3

**काकोलूकीय तन्त्रम्**
**कथा ५**
**ब्राह्मण-सर्प-कथा**

कस्मिंश्चित् अधिष्ठाने हरिदत्तःनाम ब्राह्मणःवसति स्म।तस्य च कृषि

कुर्वतःसदैव निष्फलःकालो अतिवर्तते।अथ एकस्मिन् दिवसे स ब्राह्मण उष्ण-

काल-अवसाने धर्मार्तः स्वक्षेत्र-मध्ये वृक्षस्य छायायां प्रसुप्तः।

अनतिदूरे वल्मीक-उपरि प्रसारितं बृहत्-फटा-युक्तं भीषणं भुजङ्गमं दृष्ट्वा

अचिन्तयत् "नूनम् एषा क्षेत्रदेवता मया कदाचिद् अपि न पूजिता । तेन

इदं मे कृषिकर्म विफली भवति। तद् अस्या अहं पूजाम् अद्य करिष्यामि"

इति अवधार्य्य कुतोऽपि क्षीरं याचित्वा शरावे निक्षिप्य वल्मीक-अन्तिकम्

उपगत्य अवदत् "भोः क्षेत्रपाल! मया एतावन्तं कालं न ज्ञातं

यत् त्वम् अत्र वससि। तेन पूजा न कृता। तत् साम्प्रतं क्षमस्व ।" एवम्

उक्त्वा दुग्धं न निवेद्य गृह-अभिमुखं प्रायात्।

अथ प्रातः यावद् आगत्य पश्यति तावत् दीनारम् एकं शरावे दृष्टवान् ।

एवं च प्रतिदिनम् एकाकी समागत्य तस्मै क्षीरं ददाति एकैकं च दीनारं

गृह्णाति। अथ एकस्मिन् दिवसे वल्मीके क्षीर-नयनाय पुत्रं आदिश्य

ब्राह्मणः ग्रामान्तरम् अगच्छत्।

पुत्रः अपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनः गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारम् एकं दृष्ट्वा गृहीत्वा च चिन्तितवान् "नूनं सौवर्ण-दीनार-पूर्णः अयं वल्मीकः। तत् एनं हत्वा सर्वम् एकवारं ग्रहिष्यामि।"

इति एवं संप्रधार्य अन्यस्मिन् दिवसे क्षीरं ददता ब्राह्मण-पुत्रेण सर्पः दण्डेन शिरसि ताडितः। ततः कथमपि दैव-वशात् अमुक्त-जीवित एव रोषात् तीव्र-विष-दंशनैः तथा अदशत् यथा सद्यः पञ्चत्वम् उपागत । स्वजनैः च नातिदूरे क्षेत्रस्य काष्ठ-सञ्चयैः तस्य दाहसंस्कारः कृतः।

## Lesson 4

**लब्धप्रणाश-तन्त्रम्**
**कथा १**
**वानर-मकर-कथा**

कस्मिंश्चित् समुद्र-तीरे महान् जम्बुपादपःसदाफलः आसीत्।तत्र रक्तमुखः नाम वानरः प्रतिवसति स्म। तत्र तस्य तरोः अधः कदाचित् करालमुखः नाम मकरः समुद्रः निष्क्रम्य तीर-उपान्ते आगच्छत्। ततः च रक्तमुखेन स प्रोक्तः "भोः! भवान ममभ्यागतः अतिथिः। तद् भक्षयतु मया दत्तानि अमृत-तुल्यानि जम्बु-फलानि अयच्छत्। उक्त्वा तस्मै जम्बु अयच्छत्। भक्षयित्वा गोष्ठी-सु स्व अगच्छत्। नित्यम् एव तौ वानर-मकरौ जम्बु-छायायां स्थितौ विविध-शास्त्र-गोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सः अपि मकरः अभिक्षित-शेषाणि जम्बु-फलानि गृहं गत्वा स्व-पत्न्यै प्रयच्छति स्म।

अथ अन्यतमे दिवसे तया स पृष्टः "नाथ! कुतः एवं विधानि अमृतफलानि प्राप्नोषि?" स अवदत् "भद्रे! मम अस्ति परम-सुहृद् रक्तमुखःनाम वानरः। स प्रीतिपूर्वकम् इमानि प्रयच्छति।" अथ तया अभिहितम् "यःसदैव अमृतप्रायाणि ईदृशानि फलानि भक्षयति तस्य हृदयम् अमृतमयं भविष्यति। तत् यदि मया भार्यया ते प्रयोजनम् ततः तस्य हृदयं मह्यम् आनीय प्रयच्छ येन तद्

भक्षयित्वा जरा-मरण-रहिता त्वया सह भोजनं खादामि।"

मकर:अवदत् "भद्रे! मा मा एवं वद। यतः स प्रतिपन्नः अस्माकम् भ्राता।

अपरं च फल-दाता। ततो व्यापादयितुं न शक्यते। तत् त्यज एनं मिथ्या

आग्रहम्।"मकरी अवदत् "यदि तस्य हृदयं न भक्षयामि तत् आमरणम्

अनशनं करिष्यामि ।"

" तत् किं करोमि ?" इति विचिन्त्य मकरः वानरपार्श्वम् अगच्छत् च "तव

भ्रातृजाया अद्य माम् अकथयत् यत् त्वं मम देवरं गृहीत्वा प्रत्युपकारार्थं

गृहम् आनय नो चेत् त्वया सह मे पर-लोके दर्शनम्। तद् आगच्छ मे

गृहम्।" वानर अवदत् "भो मित्र! युक्तम् अभिहितं मद्-भ्रातृपत्न्या । परं

वयम् वनचराः युष्मदीयं च जलान्ते गृहम्।

तत् कथं शक्यते तत्र गन्तुम्। तस्मात् त्वम् एव मे भ्रातृपत्नीम् अत्र

आनय येन प्रणम्य तस्याः आशीर्वादं गृह्णामि।" मकर अवदत् "भो मित्र!

अस्ति समुद्रान्तरे सुरम्ये पुलिन-प्रदेशे अस्मद्-गृहम्। तत् मम पृष्ठम् आरुह्य

सुखेन आगच्छ त्वम्।"

तथा अनुष्ठिते अगाधे जलधौ शीघ्रेण गच्छन्तं मकरं आलोक्य

वानरःसभयम् अवदत् "भ्रातः! शनैःशनैःगम्यताम्।जल-कल्लोलैःप्लाव्यते मे

शरीरम्।" मकर अवदत् "मित्र त्वं मया वधाय समानीतो भार्या-वाक्येन

विश्वास्य । तस्याः तव मधुरं हृदयम् आस्वादयितुम् इच्छा संजाता ।

समर्पताम् अभीष्ट-देवता ।"

प्रत्युत्पन्न-मतिः वानर अवदत् "भद्रे! यदि एवं तत् किं त्वया मां तत्र एव

न अभिहितम्? अहं स्वहृदयं सदैव जम्बुकोटरे सुगुप्तं स्थापयामि। सम्प्रति

शून्य-हृदयः अहम्। " मकर अवदत् " अहं त्वां सम्प्रति एव जम्बु-पादपं

प्रापयामि।" वानरः अपि तीरं प्राप्य झटिति जम्बुपादपम् आरुह्य अचिन्तयत्"

अहो! लब्धाः तावत् प्राणाः।"

## Lesson 5

**अपरीक्षित काकरम् तन्त्रम्**
**कथा २**

**ब्राह्मणी-नकुल-कथा**

कस्मिंश्चित् ग्रामे देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या प्रसूता सुतम् अजनयत्। तस्मिन् एव दिने नकुलं प्रसूय मृता। अथ सा सुत-वत्सला दारकवत् तं नकुलम् अपि अपालयत् परं तस्य विश्वसिति स्म। "यत् कदाचित् एष स्व-जाति-दोष-वशात् अस्य दारकस्य विरुद्धम् आचरणं कर्तुं शक्नोति" इति।

एकदा सा शय्यायां पुत्रं शाययित्वा जल-कुम्भम् आदाय पतिम् अवदत् " ब्राह्मणः जलार्थम् अहं तडागे यास्यामि त्वया पुत्रः अयं नकुलात् रक्षणीयः। " अथ तस्याम् गतायां पृष्ठे ब्राह्मणः अपि शून्यं गृहं मुक्त्वा भिक्षार्थं क्वचित् निर्गतः। अत्रान्तरे दैववशात् कृष्णसर्पः निष्क्रान्तः।नकुलः अपि स्वभाव-वैरिणं मत्वा भ्रातुःरक्षणार्थं सर्पेण सह युद्ध्वा सर्पं खण्डशः कृतवान्। ततः रुधिरेण आप्लावित-वदनःसानन्दः स्व-व्यापारं प्रकाशनार्थं मातुःसम्मुखे गतः। माता अपि तं रुधिर-क्लिन्न-मुखम् अवलोक्य अचिन्तयत्

"नूनम् अनेन दुरात्मना दारकःभक्षितः "इति निश्चित्य कोपात् तस्य उपरि तं जल-कुम्भम् अक्षिपत् ।

एवं सा नकुलं हत्वा यावत् प्रलपन्ती गृहे आगच्छत् तावत् तथा सुतः तत्रैव सुप्तःप्राप्तः। समीपे कृष्ण-सर्पं खण्डशः कृतम् अवलोक्य पुत्र-वध-शोकेन आत्म-शिरःवक्षःस्थलं च ताडितुम् आरब्धा।

अत्रान्तरे ब्राह्मणः भिक्षां गृहीत्वा समायातःयावत् पश्यति तावत् पुत्र-शोक-दुःखिता ब्राह्मणी अप्रलपत्"भो भो लोभात्मन्! लोभ-अभिभूतेन त्वया न कृतं मद्-वचः।तद् अनुभव साम्प्रतं पुत्र-मृत्यु-दुःख-वृक्ष-फलम्।"

## १. माहेश्वर सूत्र (Māhēśvara Sūtra )

अइउण् ।।१।। (Aiuṇ)

ऋलृक् ।।२।। (Ṛlṛk)

एओङ् ।।३।। (Ēōṅ )

ऐऔच् ।।४।। (Aiauc)

हयवरट् ।।५।। (Hayavaraṭ)

लण् ।।६।। (Laṇ)

ञमङणनम् ।।७।। (Ñamaṅaṇanam)

झभञ् ।।८।। (Jhabhañ)

घढधष् ।।९।। (Ghaḍhadhaṣ)

जबगडदश् ।।१०।। (Ghaḍhadhaṣ)

खफछठथचटतव् ।।११।। (Khaphachaṭhathacaṭatav)

कपय् ।।१२।। (Kapay)

शषसर् ।।१३।। (Śaṣasar )

हल् ।।१४।। (Hal)

## २. उच्चारण सूत्र (Uccāraṇa Sūtra)

१. अकुहविसर्जनीयानां कण्ठः। (Akuhavisarjanīyānāṃ Kaṇṭhaḥ)

२. इचुयशानां तालु। (Icuyaśānāṃ Tālu)

३. ऋटुरषाणां मूर्धा। (Ṛṭuraṣāṇāṃ Mūrdhā)

४. लृतुलसानां दन्ताः। (Lṛtulasānāṃ Dantāḥ)

५. उपूपध्मानीयानामोष्ठौ।(Upūpadhmānīyānāmōṣṭhau)

६. ञमङणनानां नासिका च। (Ñamaṅaṇanānāṃ Nāsikā Ca)

७. एदैतोः कण्ठतालु। (Ēdaitōḥ Kaṇṭhatālu)

८. ओदौतोः कण्ठोष्ठम्। (Ōdautōḥ Kaṇṭhōṣṭham)

# 4. Other information

## Equality and inclusion

We have taken great care in the preparation of this syllabus and assessment materials to avoid bias of any kind. To comply with the UK Equality Act (2010), we have designed this qualification with the aim of avoiding direct and indirect discrimination.

The standard assessment arrangements may present unnecessary barriers for candidates with disabilities or learning difficulties. Arrangements can be put in place for these candidates to enable them to access the assessments and receive recognition of their attainment. Access arrangements will not be agreed if they give candidates an unfair advantage over others or if they compromise the standards being assessed.

Candidates who are unable to access the assessment of any component may be eligible to receive an award based on the parts of the assessment they have taken.

Information on access arrangements is in the *Cambridge Handbook* at
**www.cambridgeinternational.org/eoguide**

## Language

This syllabus and the associated assessment materials are available in English only.

## Exam administration

To keep our exams secure, we produce question papers for different areas of the world, known as 'administrative zones'. We allocate all Cambridge schools to one administrative zone determined by their location. Each zone has a specific timetable. Some of our syllabuses offer candidates different assessment options. An entry option code is used to identify the components the candidate will take relevant to the administrative zone and the available assessment options.

## Retakes

Candidates can retake the whole qualification as many times as they want to. This is a linear qualification so candidates cannot re-sit individual components.

## Grading and reporting

Cambridge O Level results are shown by one of the grades A*, A, B, C, D or E, indicating the standard achieved, A* being the highest and E the lowest. 'Ungraded' indicates that the candidate's performance fell short of the standard required for grade E. 'Ungraded' will be reported on the statement of results but not on the certificate. The letters Q (pending), X (no result) and Y (to be issued) may also appear on the statement of results but not on the certificate.

## How students and teachers can use the grades

Assessment at Cambridge O Level has two purposes:

- to measure learning and achievement

  The assessment:

  – confirms achievement and performance in relation to the knowledge, understanding and skills specified in the syllabus, to the levels described in the grade descriptions.

- to show likely future success

  The outcomes:

  – help predict which students are well prepared for a particular course or career and/or which students are more likely to be successful

  – help students choose the most suitable course or career.

Cambridge Assessment International Education
The Triangle Building, Shaftesbury Road, Cambridge, CB2 8EA, United Kingdom
Tel: +44 (0)1223 553554  Fax: +44 (0)1223 553558
Email: info@cambridgeinternational.org    www.cambridgeinternational.org

Copyright © UCLES September 2019